लोकप्रियसाहित्यग्रन्थमाला-२०

मञ्जुनाथग्रन्थावलिः

द्वितीयभागे

द्वितीयः खण्डः

# निबन्धा ललितनिबन्धाश्च


प्रधानसम्पादकः

राधावल्लभत्रिपाठी

कुलपतिः

सम्पादकौ

देवर्षि-कलानाथशास्त्री

रमाकान्तपाण्डेयः



राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

लोकप्रियसाहित्यग्रन्थमाला-२०

# मञ्जुनाथग्रन्थावलिः

( मञ्जुनाथोपाह्वभट्टश्रीमथुरानाथशास्त्रिणां काव्यरचनानां सङ्ग्रहः )

## द्वितीयभागे

### द्वितीयः खण्डः

# निबन्धा ललितनिबन्धाश्च

प्रधानसम्पादकः
**प्रो. राधावल्लभत्रिपाठी**
कुलपतिः

सम्पादकौ
**देवर्षि-कलानाथशास्त्री**
**डॉ. रमाकान्तपाण्डेयः**

**राष्ट्रियसंस्कृतसंस्थानम्**
मानितविश्वविद्यालयः
नवदेहली

# विषयानुक्रमणिका


| | |
|---|---|
| पुरोवाक् | iii |
| मञ्जुनाथप्रशस्तयः | vii |
| सम्पादकीयं निवेदनम् | ix |
| भट्टश्रीमथुरानाथशास्त्रिप्रणीतटीकादिग्रन्थानां परिचयः | xvii |
| भट्ट-श्रीमथुरानाथशास्त्रिणां जीवनं साहित्यसेवा च | xxiii |
| भूमिका | xxxix |


## निबन्धा ललितनिबन्धाश्च


| | पृ.सं. |
|---|---|
| **विस्तृता निबन्धाः** | १ |
| **भारतवैभवम्** | २ |
| क) भारतीयं गौरवम् | १५ |
| ख) भारतस्य सीमा | २६ |
| ग) आर्याणामावासः | २८ |
| घ) मध्यकालः | ६० |
| ङ) सोमनाथे यवनाक्रमणम् | ६४ |
| च) नादिरशाहस्याक्रमणम् | ६८ |
| छ) मोगलकालः | ७२ |
| ज) स्वातन्त्र्यात् पूर्वं भारतस्य प्रान्ताः | ७८ |
| झ) आर्यावर्त्तस्य राष्ट्रिया एकता | ८२ |
| **गीर्वाणगिरागौरवम्** | ८८ |
| क) संस्कृतभाषायाः अपारा साहित्यसम्पत्तिः | ११० |
| ख) संस्कृतभाषायां प्रचुरा साहित्यसामग्री | १२३ |
| ग) संस्कृतभाषायाः अतिप्राचीनता | १२५ |
| घ) वर्तमानयुगस्यापेक्षा च संस्कृत-भाषा च | १४० |
| ङ) संस्कृतभाषायामन्यभाषाशब्दानां शनैः शनैः प्रवेशः | १४९ |
| च) संस्कृतनिष्ठा हिन्दीशब्दावली | १५१ |
| **ललितनिबन्धाः** | १५२ |
| १. किन्तोः कुटिलता | १५३ |
| २. बालकभृत्यः | १६५ |
| ३. हीरकः | १७१ |
| ४. मकार-महामेलकम् | १७३ |
| ५. रूप्यकरामस्यात्मकथा | १७६ |
| ६. श्रीहनूमतः आदर्शचरितम् | १८२ |
| ७. हंसवाहना सरस्वती मयूरवाहना कथं जाता | १८६ |
| ८. भारतीयं भोजनशास्त्रं शष्कुली 'जलेबी' च | १९१ |
| ९. विच्छित्तिवैपुल्यं विविधा विधाश्चाभिक्तेः | २०१ |
| १०. मृत्यो! त्वमागतोऽसि | २१२ |
| ११. अपि नाम सेयमव्यवहारिकी? | २१५ |

मृत्योरनन्तरं तदीयसेनापतिना सेल्यूकसेन पश्चिम-एशियाप्रदेशे साम्राज्यमभूत् स्थापितम्। तेषां राजदूतः सोयं मेगास्थानीजः ३०४ ई. पूर्वं मौर्यसम्राजश्चन्द्रगुप्तस्य राजसभायां किञ्चित्काल-पर्यन्तमतिष्ठत्। तेन हि एको यात्रावृत्तान्तः समभूल्लिखितः। तस्यैव हि उपलब्धेभ्यः अंशेभ्यो निम्नाङ्कितं वृत्तमुद्धृतं पाश्चात्यैः। मेगास्थनीजः कथयति-"समस्तोऽपि भारतदेशः एको विराट्देशः, यस्मिन् हि विभिन्न विभिन्न जातीनां लोकाः सुखं निवसन्ति। एषां मध्ये एकोऽपि जनो मूलतो विदेशिवंशोत्पन्नो नास्ति। मार्मिकेण सुस्पष्टं ज्ञायते यत् सर्वेऽपि भारतीयाः आदिमभारतवासिनां वंशधराः। एतदतिरिक्तं भारतेऽस्मिन् वैदेशिकलोकानां कदापि कश्चिदुपनि-वेशो नाऽभूत् स्थापितः। न च भारतेनाऽपि विदेशे गत्वा कश्चिदुपनिवेशः स्थापितोऽभूत्।"

आधुनिकानाम् पाश्चात्य-ऐतिहासिकानां मतानुसारम् अनुमानतः २५०० वर्षाण्यारभ्य १५०० ई. वर्षपूर्वम् यावत् आर्यजातीयं दलम् उत्तर-पश्चिम सीमान्तमार्गेण भारतेऽस्मिन् प्राविशत्। आगत्यैव च तेन एतद्देशनिवासिनः द्रविड-कोल-भील जातीयान् विजित्य क्रमशः स्वीयोपनिवेशः स्थापितः। इमे आर्याः हिन्दू-पारसी-काकेशीय-ग्रीकप्रभृति यूरोपीयजातीनामासन् पूर्वजाः। भारताद् बहिः कस्मिन्नपि स्थाने एतेषां प्राचीना निवासभूमिरासीत्।

यदि तदिदं सत्यं तर्हि भारतेऽस्मिन्नभियानमार्याणां, मेगास्थनीजस्य भारते आगमनात् प्रायः १२०० वर्षपूर्वं निश्चितमभूत्। किन्तु मेगास्थनीजः प्रबलतया साधयति "यत् भारतस्य एकमात्रस्यापि पुरुषस्य पूर्वपुरुषाः भारताद् बहिस्तो न समागताः, न च भारतेऽस्मिन् वैदेशिकजातेरुपनिवेशः कदाचित्स्थापितोऽभूत्"।

मेगास्थनीजः सोयमुच्चपदस्थः, निरपेक्षः, बुद्धिमांश्च, पुरुषोऽभूत्। तस्य संमतिरु-पेक्षणीया न नाम सिध्येत्। तन्मतस्य अन्यान्येषामंशानां विचारे कृते निश्चेतव्यं स्याद् यदयं भारतेऽवश्यावश्यं किञ्चित्कालं स्थितो भवेत्। तद्विवरणस्य भूयस्यो वार्ताः सर्वथा विश्वास्याः सिध्यन्ति। बहूनां विषयाणामुपलभ्यन्ते प्रमाणानि। अत एव हृदि विश्वासो भवेद् यदेतास्य कृतं विवरणं प्रायः पक्षपातशून्यमेव भवेदिति।

प्रथमम्-अद्यतः २३०० वर्षेभ्यः पूर्वं भारतेऽस्मिन् न कोऽपि तदिदमजानाद् यद् भारतीया आर्याः (वैदिकाः) बहिर्देशेभ्यः समागता भारतेऽस्मिन् इति। प्रत्युत सर्वेषामयमेव निश्चयोऽभवद् यद्- प्रत्येकं भारतवासी भारतस्याऽऽदिम-निवासिनां वंशजः इति।

द्वितीयम्- बहिर्देशादागतया कयाचिदपि जात्या भारतेऽस्मिन्नाद्यावधि उपनिवेशः स्थापितः। अर्थात् भारतमिदं विदेशीय लोकेभ्यः कदापि नाऽभूत्पराजितम्। सदैव स्वाधीनं समभूत्।

तृतीयम्- भारतेनानेन द्वितीये राष्ट्रे न कदाचिदुपनिवेशः स्थापितः। अर्थात् देशेनाऽनेन अपरस्य राज्याऽपहरणस्य न कदाचिदपि चेष्टा कृतासीत्। इदं हि भारतीयराजनीतेश्चिरन्तनधाराया

साहित्याम्बुधिसंविहारनिपुणः शब्दागमज्ञाग्रणीः
छात्राध्यापनलग्नधीः शुचिमनाः काव्यप्रबन्धोद्धुरः।
छन्दःस्वेकघनाक्षरप्रियतमो देवर्षिवंशोज्ज्वलः
चित्रेऽयं प्रतिभाति भट्टमथुरानाथाभिधः कोविदः।।



भट्टश्रीमथुरानाथशास्त्री "मञ्जुनाथः"
(१८८९-१९६४)

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली